सत्त्वस्य, सत्त्वे सति उत्पत्तिमत्त्वस्य वा हेतुत्वे, एषामन्यतमव्यतिरेक उपाधिरिति न पूर्व्वसाधनव्यतिरेकः। अत एव जन्यत्वस्य नोपाधित्वं ध्वंसे साध्याव्यापकत्वादिति न दोषः। अन्ये तु यन्निश्चये यन्निरूपिता व्याप्तिर्येन विशेषणेन विना न गृह्यते तत्र विशिष्टं व्याप्यतावच्छेदकम् अकर्त्तृकत्वाभावनिष्ठव्याप्तौ च शरीरं विनैव प्रतियोगितयाजन्यत्वमवच्छेदकं कल्प्यमिति न शरीरजन्यत्वमवच्छेदकं धूमे नील इव अतो गौरवेण शरीरजन्यत्वं सप्रतियोगितया नावच्छेदकमिति व्याप्यतावच्छेदकाभावान्न शरीरजन्यत्वाभावोऽकर्त्तृकत्वव्याप्यः। व्यभिचाराभावात्तथेति चेन्न क्षित्यादावव्यभिचारात् अन्यथा क्षित्यादिकं नादृष्टहेतुकं शरीरजन्यत्वाभावादित्यपि स्यात्। नन्वस्तु तावदशरीरनित्यज्ञानादिकर्त्त्रनुमितिस्तथापि सानुमितिरयथार्थैवाशरीरे कर्त्तृत्वज्ञानत्वात् ज्ञानेच्छायत्नेषु नित्यज्ञानत्वात् शरीराजन्ये सकर्त्तृकत्वज्ञानत्वात् घटः कर्त्ता घटज्ञानादिकं नित्यं व्योम सकर्त्तृकमितिज्ञानवदिति साध्यं, नचोपजीव्यबाधः अनुमितिर्ह्युपजीव्या न तु तद्याथार्थ्यमपीति चेन्न कर्त्तृकार्य्ययोर्निरुपाधिकार्य्यकारणभावेन तस्याप्रयोजकत्वात् अन्यथा पर्वते वह्न्यनुमितिरयथार्था उभयसिद्धवह्निमद्भिन्ने वह्निज्ञानत्वादित्यादिना सकलान्वयव्यतिरेकव्युच्छेदः। किञ्चानुमितेरयाथार्थ्यमनेन ज्ञाप्यं, न तु कार्य्यं, तथा च दोषादुत्पन्नस्यानेन ज्ञापने तत्रायमेव दोषो दोषान्तरं वा नाद्यः अन्योन्याश्रयात् उत्पन्ने तस्मिन् ज्ञापनं ज्ञापकादेव तस्माद्दोषात्तदुत्पत्तिरिति। नान्त्योऽसिद्धेः। तर्कापरिशुद्धिस्तु न दूषणम्, यदीश्वरः कर्त्ता स्यात् शरीरी स्यात्, प्रयोजनवान् अनित्यज्ञानवान् स्यात्, क्षित्यादि सकर्त्तृकं स्यादिति तर्काणां विपर्य्यये आश्रयासिद्धिव्यर्थविशेषणतादिना विपर्य्ययापर्य्यवसानेनाभासत्वात्।

ननु क्षित्यादावेककर्त्तृसिद्धिः कुतः? एककर्त्तृकत्वेन व्याप्त्यभावात् न च लाघवात्, तस्याप्रमाणत्वात्। सकर्त्तृकत्वमानादेव तत्सिद्धिरिति चेत् न तावदनुमितिमात्रे लाघवं सहकारि, व्यभिचारात् मानाभावाच्च न हि लिङ्गपरामर्शे सति तद्विलम्बेनानुमितेर्विलम्बो येन तत् सहकारि स्यात्। नापि लघ्वनुमितौ, अन्योन्याश्रयात् नापि वह्न्यनुमितौ धूमेन वह्न्यनुमितावेकद्वित्वादिसंशयाभावापत्तेः। साधकाभावेन नानात्वासिद्धौ कर्त्तृसिद्धेरेवैककर्त्तृसिद्धिरिति चेत् न एकत्वसाधकाभावेनैकत्वासिद्धौ कर्त्तृसिद्धिरेव नानासिद्धिरित्यस्यापि सुवचत्वात्। अथ यमनालम्ब्यमानाऽनुमितिः पक्षे न साध्यसंसर्गं विषयीकरोति स पक्षधर्मताबलात् सिद्ध्यति न त्वधिकमपि तथा च द्वितीयं कर्त्तारं न विषयीकुर्वत्यपि कर्त्तारं विषयीकरोत्येवेति न द्वितीयमवगाहते। एकस्तु कर्त्ता सिद्ध्यति तद्विषयत्वेन कर्त्तृविषयैव न स्यात् एकविषयत्वाभावेन नानाविषयत्वाभावस्याप्यभावात् तद्घटितत्वात्तस्येति चेदेवं तर्हि कर्त्त्रेकत्वमपि न विषयः स्यात् एकत्वविषयत्वं विनापि कर्त्तृविषयत्वसम्भवात्। वस्तुगत्यैकः सिद्ध्यति नत्वेकत्वेनेति चेन्न एकत्वासिद्ध्या वस्तुगत्यैक इति ज्ञातुमशक्यात् तथा चेश्वरे एकत्वानेकत्वयोर्नित्यसंशय इति।

उच्यते। यत्र प्रमाणे लघुगुरुविषयता सम्भवति तत्र लाघवसहकारेण कार्य्यताव्याप्यताग्रहणे प्रत्यक्षे वृत्तिनिमित्तग्राहके उपमाने शब्दशक्तिग्राहकेऽनुमाने च तथाविधप्रमाणमात्रे च सकलतान्त्रिकैः सहकारित्वकल्पनात् एवं लाघवमेवं गौरवमिति ज्ञानानन्तरं बाधकं विना लघूनामेव कारणत्वकार्यत्वव्याप्यत्वप्रवृत्तिनिमित्तत्वशब्दशक्यत्वानां ज्ञानदर्शनात्। तत्रापि लाघवानादरे शब्दशक्यत्वादिसंशये तन्मूलकव्यवहारोच्छेदो विनिगमकाभावात्, सोऽयं विचारमारभते लाघवञ्च तदङ्गं नाङ्गीकुरुते इति महासाहसम्। नन्वेवं वस्तुगत्या नानाकर्त्तृकेषु घटत्वेन कुलालकर्त्तृकत्वानुमानेऽपि बाधकानवतारदशायां लाघवादेककर्त्तृसिद्धिः स्यात् न चेष्टापत्तिः अनुमित्यनन्तरं नानात्वैकत्वे संशयादिति चेन्न तत्रापि लाघवेन कर्त्त्रैक्यमेव सिद्ध्यति तत्सन्देहस्तु ज्ञानप्रामाण्यसंशयादिति पश्चान्नानाकर्त्तृकत्वसाधकप्रमाणादेवैककर्त्तृकताज्ञानं तत्र बाध्यते न चैवं क्षित्यादिकर्त्तर्य्यपि प्रामाण्यसंशयादेकत्वानेकत्वसंशयोदुरुच्छेदः एकत्वबाधकस्याभावेन प्रामाण्यनिश्चयात्। नचैकत्वसाधकाभाव एव बाधः, अनुमितेरेव लाघवसहकारेणैकत्वसाधनात्। अन्ये तु क्षितिकर्त्ता अङ्कुरकर्त्रभिन्नः अशरीरकर्त्तृत्वात् अङ्कुरकर्त्तृवदित्यभेदानुमानादेव कर्त्तृसिद्धिः न च क्षितिकर्त्ता अङ्कुरकर्त्तृभिन्नः अङ्कुराकर्त्तृत्वात् कुलालवदिति सत्प्रतिपक्षः अनित्यज्ञानानामाश्रयत्वस्योपाधित्वादित्याहुः तत्राप्यप्रयोजकत्वे भेदाभेदयोर्गौरवलाघवे एव शरणम्।

तथापि कथं नित्यसर्वविषयज्ञानसिद्धिः। पक्षधर्म्मताबला-